# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** | **प्रश्नपत्रम् – 7** | गुणाः –70
विषयः – धर्मशास्त्रम् | **कोड –C.E.3.6.11** | समयः - 11 तः 2 पर्यन्तम्
दिनाङ्कः –05/04/2019 | सन्दर्भग्रन्थः – विदुरनीतिः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते॥

(2) धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः।
श्री प्राणधनदारेभ्यः क्षिप्रं स परिहीयते॥

(3) विरोचन सुधन्वाऽयं प्राणानामीश्वरस्तव।
सुधन्वन् पुनरिच्छामि त्वया दत्तं विरोचनम्॥

**प्रश्नः-2 एकस्य सविस्तरमुत्तरं लिखत।** **10**

(1) विदुरेण धृतराष्ट्राय प्रदत्तः राजधर्मोपदेशः विविच्यताम्।

(2) अनारभ्यान् अर्थ्यांश्च विवेचयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) ब्राह्मणानां परिभवात् परिवादाच्च भारत।
कुलान्यकुलतां यान्ति न्यासापहरणेन च॥

(2) सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः॥

(3) लताधर्मा त्वं सपुत्रः शालाः पाण्डुसुता मताः।
न लता वर्धते जातु महाद्रुममनाश्रिता॥

**प्रश्नः-4 एकस्य सविस्तरमुत्तरं लिखत।** **10**

(1) साध्यदेवेभ्यः हंसेन प्रदत्तं उपदेशं विस्तरेण वर्णयत।

(2) विदुरेण वर्णितान् सप्तदशविधान् मूर्खप्रकारान् वर्णयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भं व्याख्या कार्या ।** **10**

(1) अनधीत्य यथा वेदान् न विप्रः श्राद्धमर्हति ।
एवमश्रुतषाड्गुण्यो न मन्त्रं श्रोतुमर्हति ॥

(2) एवं लोके यशः प्राप्तं भविष्यति नराधिप ।
वृद्धेन हि त्वया कार्यं पुत्राणां तात शासनम् ।

(3) कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ॥

**प्रश्नः-6 एकस्य वर्णनं सविस्तरं कुरुत ।** **10**

(1) आतिथ्यमहत्त्वं चिकित्सकादिनां दोषान् तापसलक्षणं च ग्रन्थोक्तदिशा विस्तरेण विवेचयत ।

(2) कीदृशाः जनाः त्याज्या- भवन्ति? इति विस्तरेण सयुक्तिं विवृणुत ।

### अन्वितयः १-३

**प्रश्नः-7 दशानां लघूत्तराणि लिखत ।** **10**

(1) अजातशत्रुरिति कस्य नामासीत्?
(2) विदुरनीतिः कस्मिन् पर्वणि आयाति?
(3) षड् दोषाः पुरुषेणेह हातव्या? के च ते?
(4) अजातशत्रोः शब्दस्य का व्युत्पत्तिः?
(5) विदुरनीतिः कस्य ग्रन्थस्य अंशो ऽस्ति?
(6) सुखस्य किं लक्षणम्?
(7) सुधन्वा कस्य पुत्रोऽस्ति?
(8) राज्ञः अङ्गानि कतिविधानि? कानि च तानि?
(9) विद्यायाः शत्रवः कतिविधाः? के च ते?
(10) स्त्रियः किमर्थं रक्ष्याः सन्ति?
(11) आत्मार्थे कां त्यजेत्?
(12) विदुरनीतौ कति अध्यायाः सन्ति?
(13) विदुरनीतेः रचयिता कः?
(14) विदुरः कं कदा उपदिशति?
(15) अपनयते इति पदस्य कोऽर्थः?